योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ६१

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

ये हि राजससात्त्विक्या जाता भुवि महागुणाः ।

ते नित्यमेव मुदिताः प्रकाशाः ख इवेन्दवः ।। १

न खेदमभिगच्छन्ति व्योमभागो मलं यथा ।

नापदा म्लानिमायान्ति निशि हेमाम्बुजं यथा ।। २

नेहन्ते प्रकृतादन्यत्ते नान्यत्स्थावरो यथा ।

रमन्ते स्वसदाचारैः स्वार्थेभ्यः पादपा यथा ।। ३

नित्यमापूर्यतां याति सुधायामिन्दुसुन्दरी ।

राम राजससत्त्वस्य मोक्षमायात्यसौ यथा ।। ४

आपद्यपि न मुञ्चन्ति शशिवच्छीततामिव ।

प्रकृत्यैव विराजन्ते मैत्र्यादिगुणकान्तया ।। ५

नवस्तबकभाविन्या लतयेव वनद्रुमाः ।

समाः समरसाः सौम्याः सततं साधुसाधवः ।। ६

अब्धिवद्धृतमर्यादा भवन्ति भवता समाः ।

अतस्तेषां महाबाहो पदमापदवासनम् ।। ७

सततं तत्तु गन्तव्यं गन्तव्यं नापदर्णवे ।

तथा तथेह जगति विहर्तव्यमखेदिना ।।

आत्मोदयाश्च वर्धन्ते यथाऽराजससात्त्विकाः ।

अचिन्त्यगत्या सच्छास्त्रं विचार्य च पुनःपुनः ।। ९

अनित्यता स्वमनसा विविधैवाशु भावतः ।

आदावन्ते च यां नित्यं क्रिया त्रैलोक्यवर्तिनीम् ।। १०

पदार्थानापदेवाशु भावयेन्नेतरत्सुधीः ।

असम्यग्दर्शनं त्यक्त्वा व्यर्थमज्ञानसंततिम् ।। ११

स्मर्तव्यं सम्यगेवेदं ज्ञानमर्थमनन्तकम् ।

कोऽहं कथमिदं जातं संसाराडम्बरं विभो।। १२

प्रविचार्य प्रयत्नेन प्राज्ञेन सह साधुभिः ।

नच कर्मसु मङ्क्तव्यं नानर्थेन सहावसेत् ।। १३

द्रष्टव्यः सर्वविच्छेदः संसारानुगतः सदा ।

साधुरेवानुगन्तव्यो मयूरेणाम्बुदो यथा ।। १४

अहंकारस्य देहस्य संसारस्याप्लवस्य च ।

स्वविचारमलंकृत्य सत्यमेवावलोकयेत् ।। १५

शरीरमस्थिरमपि संत्यक्त्वा घनशोभनम् ।

वीतमुक्तावलीतन्तुं चिन्मात्रमवलोकयेत्।। १६

तस्मिन्पदे नित्यतते सर्वगे सर्वभाविते ।

शिवे सर्वमिदं प्रोतं सूत्रे मणिगणा यथा ।। १७

यैव चिद्भुवनाभोगे भूषणे व्योम्नि भास्करे ।

धराविवरकोशस्थे सैव चित्कीटकोदरे ।। १८

कुम्भव्योम्नां न भेदोऽस्ति यथेह परमार्थतः ।

चितौ शरीरसंस्थानां न भेदोऽस्ति तथानघ ।। १९

सर्वेषामेव भूतानां तिक्तकट्वादिभेदिनाम् ।

एकत्वादनुभूतेर्हि कुतश्चिन्मात्रभिन्नता ।। २०

एकस्मिन्नेव सततं स्थिते सन्मात्रवस्तुनि ।

जातोऽयमयमुन्नष्ट इति तेषां तवेह धीः ।। २१

नच तन्नाम वस्त्वस्ति यद्भूत्वा संप्रलीयते ।

आभासमात्रमेवेदं न सन्नासच्च राघव ।। २२

उद्भूतेनाप्रशान्तेन चेतसा सपदि स्थितम् ।

नेह मोहान्त आमोक्षान्नेदं यत्तदवस्तु च ।। २३

किं किलासति रामेह मोहजाले समुज्झति ।

यत्किंचित्सङ्गसङ्गत्या विमोहे कारणं हि तत् २४

[असति जगति किं किलेह मोदः

सति च किमङ्ग विमोहकारणं तत् ।

जननमरणसंस्थितिष्वतस्त्वं

भव खमिवातिसमः सदोपशान्तः ।।]

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे जननमरणसंस्थितिर्नामैकषष्टितमः सर्गः ।।

६१ ।।